# सङ्कलनात्मकं मूल्याङ्कनम् (प्रथमसत्रम्) 2014-15

## CLASS-X

## विषय : संस्कृतम् सम्प्रेषणात्मकम्

निर्धारितसमयः - होरात्रयम् | पूर्णाङ्काः - 90

निर्देशाः - (1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

खण्डः (क) अपठित-अवबोधनम् - 10 अङ्काः

खण्डः (ख) रचनात्मक-कार्यम् - 15 अङ्काः

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 30 अङ्काः

खण्डः (घ) पठित-अवबोधनम् - 35 अङ्काः

(2) सर्वे प्रश्नाः अनिवार्याः।

(3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(4) प्रश्नसंख्या अवश्यं लेखनीया।

(5) उत्तराणि संस्कृतेन एव लेखनीयानि।

### खण्डः 'क' (अपठित-अवबोधनम्) 15 अङ्काः

प्र1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत - (10)

क्रोधः मनुष्यस्य महान् शत्रुः। क्रुद्धः जनः गुरून् अपि निन्दति, अपभाषणं करोति, ज्येष्ठानां हितवचनानि अपि न शृणोति। तस्मात् वयं क्रोधात् सावधानाः भवेम। यदि क्रोधः आगच्छति तदा तस्मिन् क्षणे मौनं धारणीयम्। मौनेन मनः शान्तं भवति, वाणी अपि नियन्त्रिता भवति। मानवस्य नाशस्य मूलकारणं क्रोधः एव वर्तते। अतः जनैः सर्वदा क्रोधं त्यक्त्वा एव कार्यं कर्तव्यम्। तदैव तेषां कल्याणं भविष्यति।

*प्रश्नाः* (2+2+4+2=10)

(I) एकपदेन उत्तरत -

(i) क्रोधे आगते किं धारणीयम्?

(ii) क्रुधः जनः केषां हितवचनानि अपि न शृणोति?

(II) पूर्णवाक्येन उत्तरत -

(i) कस्य मूलकारणं क्रोधः एव वर्तते?

(ii) मौनेन किं किं भवति?

(III) निर्देशानुसारम् उत्तरत -

(i) 'भवेम' इति क्रियापदस्य कर्तृपदं किम्?

(अ) तस्मात् (ब) वयम्

(स) क्रोधः (द) त्वम्

(ii) 'महान्' अस्य विशेष्यपदं किमत्र प्रयुक्तम्?

(अ) शत्रुः (ब) गुरून्

(स) मौनेन (द) क्रोधः

(iii) 'असावधानाः' अस्य विलोमपदं किमत्र प्रयुक्तम्?

(अ) सतर्काः (ब) क्षणे

(स) शान्तम् (द) सावधानाः

(iv) 'परित्यज्य' अस्य किम् पर्यायपदं अत्र प्रयुक्तम्?

(अ) गृहीत्वा (ब) त्यक्त्वा

(स) सर्वदा (द) वर्तते

(IV) अस्य गद्यांशस्य कृते उचितं शीर्षकं लिखत।

## खण्डः 'ख' (रचनात्मक-कार्यम्) 15 अङ्काः

प्र2. भवतः मित्रम् पारिजातः भवान् तं प्रति एकं पत्रं लिखति। अस्मिन् पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत। (10x½=5)

| मञ्जूषा |
|---|
| तत्रास्तु, भौतिकी, मेधावी, अभिन्नमित्रम्, भारतरत्नम्, दिल्लीनगरतः, नोबेल पुरस्कारेण, छात्रः, अनुसन्धानम्, योगदानम् |

यमुनाविहारः

(i)______

दिनाङ्कः ______

प्रिय मित्र पारिजात !

सुमधुरा स्मृतिः।

अत्र कुशलम् (ii)______। मित्र! ह्यः मम आचार्यः अद्वितीयस्य वैज्ञानिकस्य विषये अपाठयत्। तस्य वैज्ञानिकस्य नाम अस्ति सी.वी. रामन्। विद्यार्थिकालात् एव रामस्य जिज्ञासा (iii)______ इति विषये आसीत्। सः अतीव (iv)______ अध्यापकानां प्रियः (v)______ च आसीत्। सः सागरस्य जलं नीलवर्णं कथं भवति, इति विषये (vi)______ अकरोत्। रामन् अस्य कृते (vii)______ प्राप्तवान्। विज्ञानविषये तस्य (viii)______ महत्वपूर्णम्। रामन् (ix)______ अपि अलंकृतः। पत्रोत्तरं शीघ्रं प्रेषय। मातृपितृभ्याम् मम प्रणामाः निवेदनीयाः।


भवतः (x)______

सुबोधः

प्र3. अधः प्रदत्तम् चित्रम् आधृत्य मंजूषायां प्रदत्तशब्दानां सहायतया पञ्चसंस्कृतवाक्यानि लिखत - (10)

मञ्जूषा

ग्रन्थालयस्य, पुस्तकानि, चित्रं, जनाः, इदं, पठन्ति, अत्र अनेकानि, सन्ति, समाचारपत्रम्, व्यजनानि, पुस्तकालये, ग्रन्थपालो, पुस्तककपाटिका



अथवा

'मम ग्रामः' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत। (10)

मञ्जूषा

आदर्शः ग्रामः, परस्परं मिलित्वा, कृषकाः, वृषभाः, महिष्यः, गावः, अजाः, दुग्धम्, हरितानि क्षेत्राणि, तडागः, विकसन्ति, कमलानि, तटे, देवालयः, पाठशाला, शिक्षिताः जनाः

खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्) **30 अङ्काः**

प्र4. अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा कुरुत - (5)

(i) यथोचितं क्रियताम्।

(ii) अहं स्वमातुः स्निग्ध + छायाम् इच्छति।

(iii) कामात् क्रोधः + अभिजायते।

(iv) तच्छ्लोकं श्रुत्वा सः प्रसन्नः अभवत्।

(v) मुनि + इन्द्रः वने वसति।

प्र5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत : (6)

(i) सत्यं प्रियहितं अनुद्वेगकरं वाक्यं वाङ्मयं तपः उच्यते।

(अ) न उद्वेगकरं (ब) अन् उद्वेगकरं

(स) अन उद्वेगकरम् (द) अनु द्वेगकरम्

(ii) चतुर्युगम् एव महायुगं कथ्यते।

(अ) चत्वारि युगानां समाहारः (ब) चतुर्भिः युगानां समाहारः

(स) चतुर्णां युगानां समाहारः (द) चत्वारः युगानां समाहारः

(iii) नद्याः शीतलजलं पिबत।

(अ) शीतलं जलम् (ब) शीतला जलम्

(स) शीतलं जलः (द) शीतलः जलः

(iv) माता शिशोः मुखं कमलं इव दृष्ट्वा प्रसन्ना भवति।

(अ) मुखकमलः (ब) मुखकमलम्

(स) मुखकमला (द) मुखकमलाः

(v) अष्टानाम् अध्यायानां समाहारः व्याकरणस्य प्रसिद्धः ग्रन्थः।

(अ) अष्टाध्याय (ब) अष्टाध्यायाः

(स) अष्टाध्यायम् (द) अष्टाध्यायी

(vi) जनाः देशस्य भक्तान् पूजयन्ति।

(अ) देश्भक्तान् (ब) देशम्भक्तान्

(स) देशभक्तान् (द) देशभक्ताः

प्र6. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत - (5)

(i) सः पौराणिकम् मङ्गलाचरणं करोति।

(ii) तस्याः माता ज्ञान + मतुप् अस्ति।

(iii) त्वया तत्र अवश्यम् गम् + तव्यत्।

(iv) अत्र कोऽपि ________ रोग + इन् न भवति।

(v) इदं एकं ________ दर्शनीयम् स्थानम् अस्ति।

प्र7. अधोलिखितवाक्येषु मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत - (5)

| मञ्जूषा |
| --- |
| एव, उच्चैः, विना, शनैः, इव |

(i) विद्यां ________ जीवनं नरकम्।

(ii) कक्षायाः समीपे मा धाव, ________ चल।

(iii) हे ईश्वर! त्वम् ________ मम रक्षकः।

(iv) अयं रामः ________ सौम्यः अस्ति।

(v) पाश्चात्यगायकाः प्रायः ________ गायन्ति।

प्र8. अधोलिखिते संवादे रिक्तस्थानानि वाच्यानुसारं पूरयत - (5)

भव्या - दिशे! रात्रौ त्वम् कदा शयनम् (i)________?

दिशा - (ii)________ दशवादने शयनम् क्रियते।

भव्या - त्वया प्रातः कदा (iii)________ गम्यते?

दिशा - अहम् अष्टवादने विद्यालयं (iv)________।

भव्या - अधुना वयं गणतन्त्रदिवसस्य कार्यक्रमं द्रष्टुम् गच्छामः। त्वम् अपि अस्माभिः सह चल, एतं कार्यक्रमं च पश्य।

दिशा - मया तु प्रतिवर्षम् एषः (v)________ दूरदर्शने दृश्यते।

प्र9. अङ्कान् संस्कृतेन लिखत - (4)

(i) प्रातः 9.30 वादने दीपप्रज्वालनम्।

(ii) प्रातः 10.15 वादने अतिथेः स्वागतम्।

(iii) प्रातः 11.00 वादने नाटकाभिनयः।

(iv) मध्याह्ने 2.45 वादने कार्यक्रमसमाप्तिः।

## खण्डः 'घ' (पठित-अवबोधनम्) 35 अङ्काः

प्र10. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत - (5)

अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत् 'मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते।' एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।

राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपतिः शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदत् - हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि-शशि-तारा-मण्डल-भूषितं जगत् एतत् कथमिव पश्येयम् चक्षुर्हीनः।

*प्रश्नाः*

(I) एकपदेन उत्तरत -

(i) शक्रः कस्य रूपं धारयित्वा राज्ञः पुरतः आगतः?

(ii) किम् रवि-शशि-तारा-मण्डल-भूषितं अस्ति?

(II) पूर्णवाक्येन उत्तरत -

के सौभाग्यशालिनः सन्ति?

(III) निर्देशानुसारम् शुद्धम् उचितम् उत्तरम् प्रदत्तविकल्पेभ्यः चित्वा लिखत -

(i) 'भवतः दानवीरताम् आकर्ण्य' अस्मिन् वाक्ये भवतः सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) शक्राय (ब) राज्ञे

(स) नेत्रहीनयाचकस्य (द) याचकेभ्यः

(ii) 'भजन्ते' क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम्?

(अ) दानवीराः (ब) राजा

(स) शक्रः (द) अर्थिनः

प्र11. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥

*प्रश्नाः*

(I) एकपदेन उत्तरत -

(i) कया समं चक्षुः न नास्ति?

(ii) रागसमं किं नास्ति?

(II) पूर्णवाक्येन उत्तरत -

वास्तविकं सुखं कस्मिन् अस्ति?

(III) निर्देशानुसारम् शुद्धम् उचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत -

(i) अस्मिन् श्लोके 'राग' शब्दस्य विलोमशब्दः कः प्रयुक्तः?

(अ) सत्य (ब) दुःखम्

(स) त्याग (द) तपः

(ii) 'नेत्रम्' इति शब्दस्य पर्यायपदं श्लोके किं प्रयुक्तम्?

(अ) रागम् (ब) तपः

(स) सुखम् (द) चक्षुः

प्र12. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

राजा - हा! दग्धाः मे घोटकाः कथं रक्षणीयाः। सपदि उपायः क्रियताम्।

राजवैद्यः - कपीनां मेदसा दोषो वह्निदाहसमुद्भवः।
अश्वानां नाशमभ्येति तमः सूर्योदये यथा ॥

राजा - यथोचितं क्रियताम्।

वानराः - हा! हताः वयम् अवधीरिताः अस्माभिः गुरुजनोपदेशाः। आज्ञा गुरूणां हि अविचारणीया।

*प्रश्नाः*

(I) एकपदेन उत्तरत -

(i) अस्माभिः केषां आज्ञा अवश्यं पालनीया?

(ii) केषां वह्निदोषः कपीनां मेदसा शाम्यति?

(II) पूर्णवाक्येन उत्तरत -

सूर्योदये किं नाशम् अभ्येति?

(III) निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत -

(i) 'घोटकाः' इति पदस्य कृते किं पर्यायपदम् अत्र प्रयुक्तम्?

(अ) दग्धाः (ब) कपयः

(स) मेषाः (द) अश्वाः

(ii) अस्मिन् संवादे 'वयम्' सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) राज्ञे (ब) राजवैद्याय

(स) वानरेभ्यः (द) अश्वाय

प्र13. मञ्जूषातः उचितपदानि चित्वा अधोलिखितपंक्त्योः भावार्थौ पूरयत - (4)

| मञ्जूषा |
|---|
| हितकारीणि, बधिरः, शृणोति, यः, तत्परः, आचार्यः, तत्त्वं, शिष्यहिताय |

(I) को गुरुः अधिगततत्त्वः शिष्यहितायोद्यतः सततम्।

भावार्थ : स एव श्रेष्ठः (i)________ अस्ति यः (ii)________ सततं (iii)________ भवति, सः च (iv)________ जानाति।

(II) 'को बधिरः? यो हितानि न शृणोति।'

भावार्थ : अस्मिन् संसारे सः जनः एव वस्तुतः (i)________ अस्ति (ii)________ सज्जनानां (iii)________ वचनानि न (iv)________ ।

प्र14. मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोकस्य अन्वयम् पूरयत - (4)

| मञ्जूषा |
|---|
| विचक्षणैः, हितम्, रिपवः, उत्सृज्य |

मित्ररूपाः हि रिपवः सम्भाव्यन्ते विचक्षणैः।
ये हितं वाक्यमुत्सृज्य विपरीतोपसेविनः॥

अन्वयः - ये (i)________ वाक्यं (ii)________ विपरीत-उपसेविनः (ते) (iii)________ मित्ररूपाः हि (iv)________ सम्भाव्यन्ते।

प्र15. वाक्येषु रेखाङ्कितपदानां स्थाने उचितं प्रश्नवाचकं पदं प्रयुज्य प्रश्ननिर्माणं कुरुत - (4)

(i) सज्जनाः शशिकिरणसमाः भवन्ति।

(ii) सूपकारेण मेषः अर्धज्वलित-काष्ठेन ताडितः।

(iii) शारदा सर्वदा अस्माकं समीपे वसेत्।

(iv) मनसः निग्रहः वायोः इव सुदुष्करम्।

प्र16. अधोलिखितवाक्यानि घटनाक्रमानुसारम् पुनः लिखत - (4)

(i) राजा तस्मै चक्षुर्द्वयम् एव प्रयच्छति।

(ii) सः पुत्रवत् प्रजाः पालयति स्म।

(iii) भगवान् बोधिसत्त्वः शिवीनां राजा बभूव।

(iv) इदम् दृष्ट्वा शक्रः विस्मितः भवति।

(v) तस्य दानशीलतां परीक्षितुं देवराजः इन्द्रः नेत्रहीनयाचकस्य रूपे आगतः।

(vi) पुनः राज्ञः पुरतः उपस्थितः भूत्वा शक्रः तस्मै वरं यच्छति।

(vii) राज्ञः दानशीलतां श्रुत्वा देशान्तरेभ्योऽपि जनाः तत्र आयान्ति स्म।

(viii) सः याचकः एकस्य चक्षुषः दानम् अयाचत।

प्र17. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत - (4)

(i) अपूर्वः कोऽपि कोषः अयम्।

(अ) निधिः (ब) क्रोशः

(स) क्रोधः (द) कूपः

(ii) यूथपः सर्वान् कपीन् आहूय रहसि अवदत्।

(अ) गोपनीयः (ब) वने

(स) एकान्ते (द) राजभवने

(iii) सङ्गात् कामः सञ्जायते।

(अ) जानाहि (ब) अर्हति

(स) वशीक्रियते (द) उद्भवति

(iv) अनर्घम् किम्? यत् अवसरे दत्तम्।

(अ) अनवद्यम् (ब) अमूल्यम्

(स) पुण्यम् (द) सुखदा

JLTWB79

# सङ्कलनात्मकं मूल्याङ्कनम्
## द्वितीयसत्रम्, 2014 -15
## संस्कृतम् सम्प्रेषणात्मकम्
## कक्षा - दशमी

**समय : होरात्रयम्** **पूर्णाङ्काः90**

**निर्देशाः**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्डः (क) अपठित-अवबोधनम् | – | 15 अङ्काः |
| खण्डः (ख) रचनात्मक-कार्यम् | – | 15 अङ्काः |
| खण्डः (ग) अनुप्रयुक्त-व्याकरणम् | – | 30 अङ्काः |
| खण्डः (घ) पठित-अवबोधनम् | – | 30 अङ्काः |

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

**खण्डः 'क'**

**अपठित – अवबोधनम् ( 15 अङ्काः )**

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।(2+4+2+2)** 10

नगरे राजकीयादेशानुसारं निषेधाज्ञा घोषिता। नगरवासिनः स्वस्वगन्तव्यं वेगेन धावन्ति। तथापि निषेधाज्ञाम् उल्लङ्घ्य कश्चित् स्वर्णकारः आपणात् सर्वाणि आभूषणानि नीत्वा गृहं प्रति अचलत्। सहसा मार्गे सैनिकाः तस्य समीपमागत्य तं बन्दीगृहं नीतवन्तः बन्दीगृहस्य सम्मुखे कस्यचित् कान्दविकस्य आपणमासीत्। आपणस्य द्वाराणि अनावृतानि आसन्। स्वर्णकारः आभूषणस्य कारणात् चिन्तितः आसीत् यत् कोऽपि तं चौरं मत्वा न दण्डयेत्। अतः सः आभूषणपुटकम् आपणे निक्षिप्य बन्दीगृहमगच्छत्।

कतिपयदिवसानन्तरं स्वर्णकारः बन्दीगृहात् मुक्तो भूत्वा कान्दविकस्य आपणं गत्वा अवदत् - "अत्रैव अहमेकं पुटकं विसृष्टवान्, भवान् जानाति वा?" "अवगच्छामि।" इति कथयित्वा सः कान्दविकं शीघ्रमेव पुटकमानीय तस्मै दत्तवान्। सः परद्रव्यं लोष्ठवत् इति मत्वा कदापि तत्पुटकम् न उद्घाटितवान्। स्वर्णकारः कान्दविकस्य ईदृशं व्यवितत्वं

दृष्ट्वा स्वदीनतायाः रहस्योद्घाटनं कृतवान्।

प्रश्नाः

I. **एकपदेन उत्तरत।**

(i) नगरे का घोषिता?

(ii) बन्दीगृहस्य समीपे कस्य आपणम् आसीत्?

II. **पूर्णवाक्येन उत्तरत।**

(i) स्वर्णकारः किमर्थम् आभूषणपुटकं कान्दविकस्य आपणे निक्षिप्तवान्?

(ii) बन्दीगृहात् निर्गत्य स्वर्णकारः कान्दविकस्य आपणं गत्वा किमवदत्?

III. **निर्देशानुसारम् उत्तरत।**

(i) 'अवगच्छामि' इत्यस्य शब्दस्य पर्यायपदं किम्?

(अ) मत्वा (ब) जानाति

(स) जानामि (द) गच्छामि

(ii) 'नीत्वा' इति पदस्य विपरीतार्थकपदं किम्?

(अ) नीतवन्तः (ब) आनीय

(स) भूत्वा (द) निक्षिप्य

IV. **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत**

2 **अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।(1+2+2)** 5

एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम्।

सहैव दशभिः पुत्रैः भारं वहति रासभी॥

प्रश्नाः

I. एकपदेन उत्तरत।

का निर्भयं स्वपिति?

II. पूर्णवाक्येन उत्तरत।

(i) केन सह सिंही निर्भयं स्वपिति?

(ii) रासभी कैः सह भारं वहति?

III. निर्देशानुसारम् उत्तरत।

(i) 'वहति' इति क्रियापदस्य कर्तृपदं किम्?

(अ) पुत्रैः (ब) सुपुत्रेण

(स) रासभी (द) सिंही

(ii) 'भीत्या' इत्यस्य पदस्य विलोमपदं किम्।

(अ) निर्भयम् (ब) निर्भीकः

(स) भारम् (द) स्वपिति

## खण्डः 'ख'

### रचनात्मककार्यम् ( 15 अङ्काः )

3 मित्रगोष्ठ्यां सम्मिलितुं विद्वांसं मित्रं प्रति लिखितेपत्रे रिक्तस्थानानि मञ्जूषायाः उचितपदैः पूरयत ( ½x10=5) 5

टैगोरविद्यालयः

कोलकातातः

तिथिः ________

श्रद्धेयाः शास्त्रिमहाभागाः!

प्रणामाः ।

विदाङ्कुर्वन्तु ____(i)____.यत् श्वः सायंकाले ____(ii)____.मम निवासस्थाने ____(iii)____. मित्रगोष्ठी समायोजिता____(iv)____.; यस्यां विविधेषु सामयिकविषयेषु ____(v)____. भविष्यति। भवतां ____(vi)____.इयं गोष्ठी सविशेषं गौरवान्विता____(vii)____. मम सर्वेषां ____(viii)____. विश्वासः। अतः____(ix)____.आगत्य अस्माकं ____(x)____. संवर्द्धनीयः इति सविनयं प्रार्थयते


भवतां कृपाकांक्षी

आदित्यः

**मञ्जूषा**

**मित्राणां, शुभागमनेन, उत्साहः, भवन्तः, यथासमयम्, भविष्यतीति, चर्चा, षड्वादनवेलायां, वर्तते, एका**

4 **अधःप्रदत्तम् चित्रम् आधृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च संस्कृतवाक्यानि लिखत।(2x5=10)** 10



**मञ्जूषा**

**मनोहारि, सूर्यः, नश्यति, दृश्यम्, जलार्पणम्, उदेति, चटकाः, जनाः पूर्वदिशायाम्, कूजन्ति, तमः।**

अथवा

''अस्माकं भारतम्'' इति विषयमधिकृत्य म ञ्जूष ायां प्रदत्तशब्दानां सहायतया प ञ्चसंस्कृतवाक्यानि लिखत। 10
( 2x5=10)

मञ्जूषा-

भारतवर्षे, अस्य, उत्तरस्याम्, अस्माकं, कृषि-प्र धानम्, षड्ऋतवः, अस्ति, देशः, हिमालयः, हिन्दमहासागरः, भारतम्

खण्डः 'ग'

अनुप्रयुक्तव या करणम्( 30 अङ्काः )

5 अधोलिखितेषु वाक्येषु रे खाङ्कितपदेषुसन्धिच्छेदम् अथवा सन्धिं कृत्वा लिखत। 4

(i) एतत्+अर्थम् स्थलानां दर्शनाय प्रबन्धः वर्तते।

(ii) यः प्रभूतानि सुखानि च इ च्छत्यात्मनः श्रेयः।

(iii) इदं श्रेयः+करमअस्ति।

(iv) नाविकः नद्यां तरति।

6 अधोलिखितेषु वाक्येषु रेखांकि ता पदेषु समासं विग्रहं वा कृत्वा लिख।। 5

(i) अहम् तत्र स ामित्रमअगच्छम्।

(अ) मित्राय सह (ब) मित्रेभ्य ः सह

(स) सु मित्रम् (द) मित्रेण सह

(ii) शुभम् आननं यस्याः सा स्त्री तत्रास्ति।

(अ) शुभानना (ब) शुभाननः

(स) शुभाननम्　　(द) शुभानना

(iii) हंसौ उद्याने स्तः।

(अ) हंसाः च हंसी च　　(ब) हंसः च हंसी च

(स) हंसौ च हंसौ च　　(द) हंसम् च हंसी च

(iv) नृपः अवदत् - यथेच्छम् गृहाण।

(अ) इच्छा अनुसारम्　　(ब) इच्छया अनतिक्रम्य

(स) इच्छाम् अनतिक्रम्य　　(द) इच्छैः अनतिक्रम्य

(v) 'अयं निजः परः वा'- इति लघूनि चेतांसि येषां तेषामगणना।

(अ) लघुचेतसः　　(ब) लघुचेतसे

(स) लघुचेतांसि　　(द) लघुचेतसाम्

7 अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। 5

(i) लेखं लिख्+शतृ ________ बालकात् स्वलेखनीम् आनय।

(अ) लिखन्　　(ब) लिखतः

(स) लिखता　　(द) लिखन्तौ

(ii) कम्प्+शानच् ________ वृक्षम् पश्य।

(अ) कम्पमानः यः　　(ब) कम्पमानः

(स) कम्पमानम्　　(द) कम्पमाना

(iii) अस्माभिः सेवायाः महत्त्वं ________ ज्ञातव्यम्।

(अ) महत्+त्व　　(ब) महत्+त्व।

(स) महत्व (द) महत्वं

(iv) बालकस्य निपुणत________ प्रशंसनीया खलु।

(अ) निपुण+तलता (ब) निपुण+तल

(स) निपुण+तल् (द) निपुणत+तल्

(v) पवित्र+टाप् ________ गङ्गा प्रदूषिता न कर्तव्या।

(अ) पवित्रः (ब) पवित्रा

(स) पवित्रम् (द) पवित्रता

8 अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्त अव्ययपदैः पूरयित्वा वाक्यानि पुनर्लिखत 5

(i) ________ मम अवकाशः आसीत्।

(ii) 'यत्र परिश्रमःतत्र सफलता' ________ सत्यम्।

(iii) अहम् ________ विद्यालयं न गमिष्यामि।

(iv) ________ असत्यं न ब्रूयात्।

(v) त्वम् कार्यक्रमं द्रष्टुम् ________ गमिष्यसि ?

**मञ्जूषा**

**इति, कदापि, कदा, श्वः, ह्यः**

9 अधोलिखितवाक्येषु अङ्कानां संस्कृतसंख्यावाचकशब्दानां वा उचितपदैः रिक्तस्थानपूर्तिं कुरुत 5

(i) वृक्षे (त्रि) ________ फलानि सन्ति।

(ii) रावणस्य (एक) ________ प्रिया राज्ञी आसीत्।

(iii) मम (द्वि) ________ भ्रातरौ स्तः।

(iv) (चतुर्) ________ महिलाः कूपात् जलं आनयन्ति।

(v) आश्रमे (95) ________ छात्राः पठन्ति।

10 अधोलिखितवाक्येषु रेखाङ्कितपदानां स्थाने प्रदत्तविकल्पेभ्यः शुद्धं पदं चित्वा लिखत। 6

(i) वयम् गुरून् नमामि।

(अ) नमावः (ब) नमावहे

(स) नमामः (द) नमामहे

(ii) कक्षायां त्रीणिबालकाः सन्ति।

(अ) त्रयाः (ब) तिस्रः

(स) त्रयः (द) त्रिषु

(iii) त्वम् पुस्तकं पठामि।।

(अ) पठति (ब) अपठः

(स) पठसि (द) अपठम्

(iv) लोभं न कर्तव्यः।

(अ) लोभाः (ब) लोभः

(स) लोभेन (द) लोभात्

(v) वृक्षः परोपकाराय फलन्ति।

(अ) वृक्षान् (ब) वृक्षात्

(स) वृक्षाः (द) वृक्षेषु

(vi) ते ह्यः किमर्थं नगरं गमिष्यन्ति।

(अ) गमिष्यतः (ब) अगच्छन्

(स) अगच्छः (द) अगच्छाम

## खण्डः 'घ'

## पठित-अवबोधनम् ( 30 अङ्काः )

11 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।(1+1+2) 4

दुष्टबुद्धिः तु तयोः वार्ताम् श्रुत्वा झटिति एव क्षेत्रं गतः। तत्र अश्वत्थमूलं खनित्वा तं सुवर्णकलशं प्राप्तवान्। यदा सः तस्य आवरणं अपसारयति तदैव भयङ्करम् एकं विषधरं फूत्कारं कुर्वन्तं पश्यति। भीतः सः कलशं पुनः आवृत्य तम् च आदाय मित्रस्य गृहं समागतः। स्वमित्रं सर्पेण मारयितुम् इच्छन् सः भित्तौ सन्धिं प्रकल्प्य तन्मध्यतः कलशं गृहाभ्यन्तरे क्षिप्तवान्।

I. एकपदेन उत्तरत।

सुवर्णकलशः कस्य वृक्षस्य मूले स्थितः आसीत्?

II. पूर्णवाक्येन उत्तरत।

दुष्टबुद्धिना मित्रस्य गृहे मोचितः विषधरः कं दष्टवान्?

III. निर्देशानुसारम् उत्तरत।

(i) 'यदा सः तस्य आवरणं' इति वाक्ये 'तस्य' सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) मित्राय (ब) अश्वत्थाय

(स) सुवर्णकलशाय (द) कलशाय

(ii) 'दूरीकरोति' इत्यर्थे किं क्रियापदम् अत्र प्रयुक्तम्?

(अ) आवरणम् (ब) अपसारयति

(स) झटिति (द) फूत्कारं

12 अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।(1+1+2) 4

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।

न कुर्यादहितं कर्म स परेभ्यः कदापि च।।

I. एकपदेन उत्तरत।

मनुष्यः आत्मनः किम् इच्छति?

II. पूर्णवाक्येन उत्तरत।

सुखार्थी नरः कदापि केभ्यः अहितं न कुर्यात्?

III. निर्देशानुसारम् उत्तरत।

(i) 'इच्छति' क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

(अ) यः (ब) आत्मनः

(स) श्रेयः (द) सः

(ii) 'सुखानि' इति पदस्य किम् विशेषणपदम्?

(अ) आत्मनः (ब) श्रेयः

(स) प्रभूतानि (द) कर्म

13 अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।(1+1+2) 4

श्रीकृष्णः -- भो धर्मराज! समीचीनं न कृतं भवता। पुत्रशोकविह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति।

युधिष्ठिरः -- भगवन्! सः तु एकाकी एव द्रोणपुत्राय अलम्।

श्रीकृष्णः -- वत्स! न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात्।

युधिष्ठिरः -- अप्येवम्! आचार्येण कीदृशः अनर्थः कृतः। किं चपलबालकेभ्यः एतादृशभीषणानाम् अस्त्राणाम् प्रदानम् उचितम्?

I. एकपदेन उत्तरत।

कः एकाकी एव द्रोणपुत्राय अलम्?

II. पूर्णवाक्येन उत्तरत।

यदि ब्रह्मशिरोनामअस्त्रं प्रयुज्यते तदा किं स्यात्?

III. **निर्देशानुसारम् उत्तरत।**

(i) 'अश्वत्थामानम्' अस्य किं पर्यायवाचिपदं संवादे प्रयुक्तम्?

(अ) द्रौणिम् (ब) आचार्यम्

(स) द्रोणम् (द) 'धर्मराज' इति

(ii) 'चपलां प्रकृतिम्' अत्र किं विशेष्यम्?

(अ) चपलां (ब) प्रकृतिम्

(स) भवान् (द) द्रौणेः

14 **अधोलिखितस्य कथनद्वयस्य समुचितं भावं प्रदत्त-विकल्पेभ्यः चित्वा उत्तरपुस्तिकायां लिखत।** 2

**(क) सर्वथा जागरूकोऽहं छात्राणाम् कृते आदर्शः एव।**

(i) काकः छात्रः इव जागरूकः भवति।

(ii) काकः स्वकर्म प्रति सर्वथा जागरूकः भवति अतः सः छात्राणाम् कृते आदर्शः एव।

(iii) काकः स्वकटुभिः क्वणितैः जागरणम् करोति।

(iv) काकः सर्वथा जागरूकः भवेत्।

**(ख) स चेन्निरर्थकं नीतः का नु हानिः ततोऽधिका।**

(i) यदि मनुष्यः जीवनस्य एकमपि क्षणं निरर्थकं यापयति ततः तस्य सर्वाधिका हानिः न कापि।

(ii) यदि समयः निरर्थकं व्यतीतः यापितः वा तर्हि काऽपि हानिः न भविष्यति।

(iii) कालः निरर्थकं यापयितव्यम् एवम् अधिका हानिः न भवति।

(iv) समयस्य किमपि महत्त्वं नास्ति अतः निरर्थकं यापयितव्यः।

15 **अधोलिखितश्लोकस्य अन्वयम् उचितपदैः पूरयत।** 4

नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथाः।

नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन।।

अन्वयः- पूर्वे ये अपि नानाशस्त्रविदः __(i)__ अतीताः तैः एतद् __(ii)__ मनुष्येषु __(iii)__ न __(iv)__ ।

16 अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। 5

(i) विद्वान् मनुष्यः धर्मप्रदांवाणीं वदेत्।

(ii) विद्वांसः चक्षुष्मन्तःप्रकीर्तिताः।

(iii) धर्मप्रदां वाचम् विमूढधीःत्यजति।

(iv) मन्त्री सभायाम् अकातरः भवेत्।

(v) अहितम् कर्म न करणीयम्।

17 अधोलिखितवाक्यानि कथाक्रमानुसारम् लिखत। ( ½x8=4) 4

(i) प्रच्छन्नभाग्यः बाल्यकाले विद्यां न अधीतवान्।

(ii) एकस्मिन् नगरे प्रच्छन्नभाग्यः नाम कश्चित् कुमारः आसीत्।

(iii) दुष्टबुद्धेः संगत्या प्रच्छन्नभाग्यः चौरः अभवत्।

(iv) तौ मार्गे क्रीडतः बालकान् दृष्ट्वा अवदताम्- भोः! किमर्थं विषमे मार्गे क्रीडथ।

(v) प्रच्छन्नभाग्यस्य नेत्रे समुन्मीलिते जाते।

(vi) एकः बालकः उवाच- भवन्तौ किमर्थं सुपथं त्यक्त्वा कुपथेन गन्तुं प्रवृत्तौ।

(vii) प्रच्छन्नभाग्यः दुष्टबुद्धिम् अवदत्- 'सखे! साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्'

(viii) एकदा स दुष्टबुद्धिना सह धनहरणार्थम् अगच्छत्।

18 रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थम् चित्वा लिखत। 3

(i) द्रौणेः अस्त्रं अस्मान् सर्वान् प्रधक्ष्यति एव।

(अ) द्रोणाचार्यस्य (ब) अश्वत्थाम्नः

(स) द्रोणपुत्राणां (द) सेनापतेः

(ii) इदं ब्रह्मास्त्रं सर्वान् दग्धक्ष्यति एव।

(अ) प्रकाशयिष्यति (ब) भेष्यति

(स) ज्वालयिष्यति (द) कम्पयिष्यति

(iii) पूर्वैः महारथैः एतद् अस्त्रं मनुष्येषु कथञ्चन न प्रयुक्तम्।

(अ) कुत्रचित् (ब) कदापि

(स) यदा-कदा (द) केनापि प्रकारेण

-o0o0o0o-